कोणार्के

प्रफुल्ल कुमार मिश्रः

परिसर वैविध्य प्रोत्साहनम् (फोडन्यास सहाय प्रकल्पः)
उत्कलविश्वविद्यालयः

कैलाश



कोणार्के

(कोणार्क-मन्दिर-गात्राङ्कित- प्रतिमा-सम्बलिताः कविताः)



प्रफुल्ल कुमार मिश्रः

(संस्कृत-वर्ष-पालनावसरे निवेदितम्)

प्रकाशकः
परिसर-वैविध्य-प्रोत्साहनम् (फोड न्यास सहाय प्रकल्पः)
उत्कलविश्वविद्यालयः
भुवनेश्वरम्

KONARKE

Poet : Dr Prafulla Ku. Mishra
Professor, P.G.Dept of Sanskrit, Utkal University
Vanivihar, Bhubaneswar-51004,
ORISSA, INDIA

Publisher: Prof.S.N.Mishra
Co-ordinator, Campus Diversity Initiative
(Ford Foundation Assisted Project)
Utkal University, Vani Vihar,
Bhubaneswar- 751004,
ORISSA, INDIA.

Ist Edition- V.S 2057/58, 2001, May.
Printed at:- Siva Graphics, Bhubaneswar, Ph. 433429
© Poet
Price - 30/-

कोणार्के

कविः - डॉ. प्रफुल्ल कुमार मिश्रः
प्राचार्यः, स्नातकोत्तर-संस्कृत-विभागः,
उत्कल विश्वविद्यालयः, वाणीविहारः,
भुवनेश्वरम्-७५१००४

प्रकाशकः- प्रो.सूर्यनारायण मिश्रः
संयोजकः, परिसर- वैविध्य - प्रोत्साहम्
फोड-न्यास-सहाय-प्रकल्पः,
उत्कलविश्वविद्यालयः,
भुवनेश्वरम्-७५१००४, ओडिशा,भारतम् ।

विःसं-२०५७/५८
© कविः
मूल्यम्-त्रिंशत्रूप्यकम् .

शुभाशंसा

प्रकृते: वैशिष्ट्यं तरङ्गायिते सागरे तारकिते गगने श्यामल-शष्पवेष्टित-वनालंकृतेषु पर्वतेषु च प्रामुख्येनावभासते । भगवत: परमेश्वरस्य मूलभूतं सौन्दर्यसंरचनं स्थूलकाव्यरूपेण भाति । तदर्थं तान्यवलोक्य जडस्यापि चेतसि कविप्रतिभा स्फुटा भवति । तथैव द्धादशवर्ष -प्रयत्नशिलानामुत्कल कलाकाराणां चरमनिकषायमानं कोणार्क मन्दिरं दृष्ट्या य: कोपि कव्यते । तदर्थं कवि: प्रफुल्ल कुमार मिश्र : विवृणोति कोणार्कस्य अन्त: स्वरम् । यस्मिन् मन्दिरगात्रे युद्ध -प्रणय-रमण-गन्धर्व गान कौतुक -कला सुतरां सविस्तरं चित्रितम् । कविसहृदयानामानन्दवर्द्धनाय वर्द्धतां तावत्तस्य कवे: कविप्रतिभा इति शम् ॥

प्रफेसर गोकुलानन्द दास:
कुलपति:
उत्कलविश्वविद्यालय:

विज्ञप्तिः

अस्ति भारतस्य पूर्वोपकू ले अर्ककक्षेत्रापराभिधः चन्द्रभागा नाम तीर्थ - विशेषः अर्ककक्षेत्रेणापि परिचित । अर्ककोणत्वादेतत्स्थानं कोणार्क नाम्ना विश्वे प्रसिद्धम् । अत्रैव भगवतः कृष्णचन्द्रस्य तनुजन्मा शाम्बः सूर्योपासनया शापजनित कुष्ठरोगात् विमुक्त इति पौराणिकी वार्त्ता । गच्छता कालेन कलिङ्गः गङ्गशासनाधीनः सुसमृद्धि गतः । तेषु लाङ्गुलानरसिंहः स्वमातुः धार्मिकीं भावनां पुरयितुं निर्ममेऽत्र सूर्यमन्दिरम् । तच्च सप्तहययुक्तं चर्तुविंशति चक्रविशिष्टं च रथाकारं कलिङ्गकलाकौशलपरिपूर्ण विराजते । परं ह हा भूयो लवणवाताहतं मुखशालामात्रांशशिष्टेन वर्तते मन्दिरम् । तदपि स्व कलाकारूशिल्प गौरवेण समग्रस्य विश्वजनानामानन्दं सम्प्रत्यपि वर्द्धयन्ति ।

ततो गव्यूतिमात्रदूरे मदीयावासः । आबाल्यात् चक्रवाले छायाङ्कितं कोणार्कस्य भग्नमन्दिरमवलोक्य विस्मयेनाभिभुतो जातः । कदा दूरे कदा च पार्श्वे शताधिकवारं निशाम्य किं कर्तव्यविमूढो जातः । अथच मम ग्रामः वालिमुकुन्दपुरशासनापरनामधेयो वालिकन्दलः । प्रस्तरवाहिनी नदी ग्रामोपकण्ठस्य विस्तीर्णवालुजघनकाशकेतकी - धवल-पट्टिकायमाणा दक्षिणे श्वराख्य शिवालयसमीपतः कुशभद्रातः प्रवहति । कोणार्क मन्दिरनिर्माणाय नदीस्रोतसि समानीतेषु प्रवाहितेषु प्रस्तरखण्डेषु कानिचित् इतस्ततः पतित्वा पुरातनीं स्मृतिमुज्जीवयन्ति । अनतिदूरेऽपरवालुकास्तूपे पञ्चसख्येष्वन्यतमस्य वलरामदासस्य समाधिः वलरामगादीति जनेषु प्रसिद्धः । इदृशेषु नैसर्गिक सुषमामण्डितस्थानेष्वसकृत् अटन् पूर्वकीर्त्तिं भूयः स्मरामि । पितामह रघुनाथ मिश्रेभ्यः पितामही-सूर्यमणिदेवीभ्यो मातामही सावित्रीदेवीभ्यस्तया चान्येभ्यो ग्रामीण जनेभ्यः श्रुता नैका कथा कोणार्कस्योपरि । किम्वदन्ती सूत्रेण प्राप्ताऽपि कथा भूयो मया स्मृताः । द्वादशशतशिल्पिनां षोडशवर्षव्वापि प्रयत्नः । मन्दिरस्य गात्रे समग्रस्य संसारस्य दृश्यसकलम् । गृहतो दूरे स्थितेषु तेषां पुनः गृहस्य दृश्यं प्रतिमासु उत्कीर्णाः सन्तः दृश्यन्ते । विभिन्न देवदेवीनां मूर्त्तयः सम्यक् पूजिताः । पुरुषार्थचतुष्टयस्य चिह्नाणि तथा गन्धर्व यक्षरक्षांसि चतुः षष्ठि कलाश्च सुतरां प्रपञ्चितानि दृश्यन्ते ।

संगृहीतेषु चित्रेषु प्रथमा सश्चिकेयम् । प्रस्तरस्य स्वरं प्रतिमाया भावः काव्यमाध्यमेन प्रकटी क्रियते यतो हि संस्कृतस्य सुवर्णयुगे गङ्गशासने निर्मिते मन्दिरे संस्कृतभाषया न किञ्चिल्लिखितम् प्राचार्य सदाशिव प्रहराज महोदयानां संशोधननिमित्तम् अहम् अधमर्णः ।

उत्कल विश्वविद्यालयस्य राजनीतिविभागाध्यक्षेण मदीयाग्रजकल्पेन परिसर-वैविध्य -प्रोत्साहन-संयोजकेन श्रीमता सुर्यनारायण मिश्रेण दर्शितादरेण तथा मान्येन कुलपतिना सुगृहीत नामधेयेन आचार्यगोकुलानन्द दासमहोदयेन दत्ताशीना इयं प्रकाश्यते । ताभ्यां सहृदयवर्याभ्यां कार्त्तज्ञं विनिवेदयामि ।

कोणार्कस्य निर्मातृणां शिल्पिनां स्मरणर्पूवकं मातुः चरणकमलेषु इमां पुस्तिकां सादरं समर्पयति श्रद्धेयः प्रफुल्लः ।

अक्षयतृतीया
वि.स.२०५८

उत्सर्गपत्रम्

कोणार्कमन्दिरस्य कला-कौतुक-कुशल शिल्पिभ्यः

- कविः

सूचीः

	नामाङ्का	पृष्ठाङ्का
१.	कोणार्के (१)	०१
२.	कोणार्के (२)	०२
३.	प्रतीक्षा	०२
४.	पुत्रवती	०५
५.	वारवधूटी-कुच-चञ्चरीके	०६
६.	शुक-श्रवणा	१०
७.	मृगया (१)	११
८.	कपाला कङ्काला	१२
९.	दीक्षा	१४
१०.	वंशी धारिणी	१५
११.	वंशी वादकः	१६
१२.	वेणु पाणिः	१७
१३.	दर्पण हस्ता	१७
१४.	शुक श्रवणा (२)	१९
१५.	लतान्विता	२२
१६.	मृदङ्गवाद्याङ्गना	२२
१७.	नृत्यरता वाद्याङ्गना	२३
१८.	स्मरणम्	२३
१९.	आत्मरतिः	२४

कोणार्के
(१)

जपाकुसुमारुणरागः
धातुराग इव
कोणार्क मन्दिरगात्रे
दिवाकरकरस्पर्शेणानुरञ्जितः ॥ १ ॥

सुतरां रञ्जितमूर्त्तिः
प्रतिमा-प्रणय-प्रतिभासं
पूर्णतां जनयति ॥ २ ॥

रोगो ह्रसति, रागो वर्धते
ज्योतिं गमयति ॥ ३ ॥



१८.११.९८

कोणार्के
(२)

संसारस्य विन्दून् संयोज्य
पुरुषं स्त्रियं चित्रयसि,
तयोः प्रणयं पश्यसि
कलहं कलयसि
प्रतिभया प्रदीप्तोऽसि
येनैतत् सर्वं जीवनवृत्तं
संप्रकाश्य कोणार्कमन्दिरं प्रकल्पितम् ॥



प्रतीक्षा

अपराह्णे प्रलम्बिते ,
विद्यालयं बालेषु गतेषु,
भजनं भोजनं च सम्पादिते,
द्वारि च्छन्दपद्भ्यां
मध्ये लग्नैकहस्ता
वामहस्तलग्नमुखं
कपाटोपरि प्रलम्बते ॥१॥



मृगनयना स्मेरमुखी
सुकेशकलापा
सुवेशा प्रतीक्षते कम् ? ॥२॥
अथवा
गतदिवसे समागतस्य विटस्य
सुखकरं स्मरणं कुरुते
पुनरागमनमसकृत्
सख्या सुचितमपेक्षते ह्यस्माकं
पश्यति या व्योम वितानम् ॥ ३॥

केश- वास- विन्यास- रासे
स्मरति न सा तस्या:
विगत विलासम् ॥४॥
अथवा रतीश्वरी
समागतस्य पुरुषस्य
मुखमवलोक्य
मृदु हसति,
हसन्तीआकर्षयति,
आकृष्य जाले पातयति,
पातयित्वा मोहयति...॥५॥
दूरदेशं गत: प्रिय:
स्वदेशागमनं कुत:
भार्या प्रतीक्षते,

पुत्रमुखमवलोक्य माता
वात्सल्ये मग्ना
स्मरति तत् वितानम् ॥६॥
पुरः शून्येक्षणे अवलोक्यते
शरीरे जडीभूते,मनसि मन्द्रयते,
धनुर्धरः क्व गतो
नागरः ? ॥७॥
पुनः वेणुस्वनकारुण्ये
सघनं जघनोनुमन्थ्य
कं प्रतीक्षते ? ॥८॥
राजमण्डपे शून्यायिते
वासवल्ली- मल्ली- कुसुमायिते,
चित्ते आलीढ- यौवने
अन्यच्च सुन्दर कोमललता-विताने
जरठकारुण्ये
सर्वं संस्मरणं
रतिकेलि-कदम्बमूल -मण्डपस्थे
मुहु मोमुद्यते ॥९॥
दुःखग्लानि-गम्भीर-जीवने
पाषाणः हसति
कदाचिद् ग्रावापि रोरुद्यते ।
दरिद्राय विचित्रा दण्डविधान-पद्धतिः

दुःखपूर्णे जीवने
रौरवेऽपि गौरवं
भुवि लुण्ठिते हि जीवने
सर्वमनुकूलायते ॥१०॥

क्लान्तोऽपि कोकिलः
माधवे किं नैव वाचालायते ? ॥११॥
च्छन्दपद्भ्यां प्रतीक्षते,
मुखं मुद्रयति,
स्वप्नसमाधौ कस्मिन् रूपे(को वा वदेत्)
विलीयते ? ॥१२॥

पुत्रवती

वहुप्रतीक्षापरं देवी
जाता पुत्रवती ॥१॥
बालः क्रीडति क्रोडे यस्याः
चूचुकाग्र चुषितमुखः
सा वनिता धन्या
ह हा पीडिता श्चान्याः ॥२॥

कथं पुत्रद्वितीयात्रभवती
प्रतीक्षते स्व स्वामिनम् ? ॥३॥
सोऽयं शिल्पी कुत्र सुदूरे
कोणार्क-क्षेत्रे
सूर्यदेवस्य मन्दिर निर्माणे ॥४॥

वारवधूटी- कुच-चञ्चरीके

वारस्य कुच-चञ्चरीके
तापसो जारो न संतृप्यते ।
तन्द्रा सान्द्रायते
कस्मिन् वहलाश्मताडनविधौ
लग्नोऽपि स्मृतिः रोमन्थ्यते ।
कुत्र सोऽयं स्वगृहरमणीं
स्फुटीकरोत्यश्मके ॥१॥
चिन्तयति,
स्त्रीगर्भस्थितः सन्तान
स्तन्मुखमनवलोक्यागतः
राजाज्ञा न लंघनीया
स्थिरो विचिन्त्य ॥२॥

साऽपि तत्र
एकाकिन्यवला अलसा अनाथा
सर्वस्मिन् मन्थरायते ।
हन्त! इदानि कान्तो
दूरं विदेशं गतः
अतो गाम्भीर्यं विस्तार्य
दीर्घं स्वशिति खिन्न मनसा यत्-
ममात्र किं दुःखं ऋते प्रियं !
ममात्र सर्वे परिवार- जनाः ।
कुत्रास्ति तस्य निवासः
किश्च भोजनं
किं वा शरीरे सुखम् ?
स्वस्थो वर्त्तते वा
राजवसतौ स्व प्रियां स्मरेद् वा ?
किं वा गर्भभारालसा
स्मृत्वा कुट्यां शोचति ॥ ३॥
किं तस्य ग्रामवृद्ध-वर्धकिकुलं
कार्ये ह्यसकृत् क्रोशति ।
येनासौ स्वस्य दुःखं पाययितुमाकुलितः
स्वस्य वयसः पुरः क्रन्दति,
किं वा तस्त नास्ति कोऽपि समरसी
न वा मनोरञ्ज्यते ।

यतो हि तस्य नास्ति
वागवसरः चित्रे तदुत्कीर्य्यते ॥४॥
प्रस्तर स्रस्तरायिते कलेवरे
पाषाणायिते हृत्कमलकोरके
कारुकलाविलास सुखेन
स्वस्य प्रियां पश्यति ।
स्थपति मनसा पृथुल जघनां जायां
नित्यं हि आलिङ्गति ॥५॥
स्फुरद् गर्भभार ललना
जडता वितताल सशरीर,
जडता विततता अलसे
दीर्घं श्वसिति उपविशति हसति
कदा च लसति ॥६॥
गाम्भीर्यं प्रकाशयति,
दीर्घं शोचति,
खिन्नमनसा
स्वस्वामिनि दूरं गते ॥७॥
किं भोज्यं कुत्र शय्या
शरीरं सुखेऽथवा
स्वस्थस्तिष्ठति वा राजवसतौ
किं न स्मरेत् स्व प्रियाम् ?
अथवा

गर्भभारवहनालसां
स्मृत्वा कुट्यां शोचति ॥८॥
किं ग्राम-वृद्ध-वर्धकि-कुलं
तस्य कार्येऽसकृत् क्रुध्यति,
येनाऽसौ स्वस्य दुःखे न विगलितहृदये
मित्रस्य पुरः क्रन्दति ॥९॥
यदि तस्य नास्ति कोऽपि सखा,
न वा मनो रमते कुत्रचित् विलासे,
वहुगुणिते दुःखे तदर्थं
समुद्रं विलोक्येत् ॥१०॥
एतत्सर्वं विचिन्त्य
चित्तेऽपि रञ्जिते
प्रस्तरस्रस्तरायिते कलेवरे
प्रस्तरायितं तद्दिनं
कारुकला विलासमयी मुखे
स्वस्य प्रियां पश्यति ॥११॥
भावपूर्णैः निर्माय प्रियतमां
पृथु-तनु-पृथुलां
नित्यं परिरम्भते ।
स्फुरद् गर्भस्यभारादजनि
तनयस्तस्याः ॥१२॥

अग्निना सन्ताप्य स्वस्याः
क्षत-शोणितार्द्र-योनि गर्भाशयं च
विना वैद्यं चिकित्सते ।
स्वस्याः पुत्रं
क्रोडे चालिङ्ग्य मोमुह्यते
यस्मिन् स्वस्याः प्रियं पश्यति॥

शुक-श्रवणा

शुकं सदा स्वहस्तेन
सस्नेहं परामृश्य
सुकोमलवाचा
परिपृच्छति स्वस्याः
प्रियस्यागमनम् ॥१॥
शुको ब्रुते,
मानमयि!
किं प्रियस्य प्रणय-वचनं,
तव तनुलतायां
हस्त-स्पर्श-रोमाञ्चनं
मुहुः चुम्बनमालिङ्गनं च
विस्मृतासि ?



मृगया

(१)

प्रतीक्षते गृहे पत्नी
द्वारे वृद्धा माता,
शुकं सारीकाश्च पृच्छन्ती,
निषादपुत्रः महारण्ये कुरुते
वराहस्यान्वषेणम् ॥९॥
क्रुद्धा माता स्नुसां दृष्ट्वा
किमर्थमस्मिन्काले
शुकरमांसलोभात्
प्रेषितः पुत्रः
प्रातराशं विना ? ॥२॥
अस्तप्राये दिवाकरे
क्वास्ति मे पुत्रकः ?
क्वः गतोऽयं ?
पिता यस्य मृगयाव्यसनी
व्याघ्रनखैर्दिवं प्रेरितः ॥३॥



कपाला कङ्काला

नृमुण्डमालया शोभते
साधना कुटीरम् ।
स्वयं कङ्कालप्रायै-
र्योगिनीगणैः
रोमाञ्चकराट्टहासैः
कुटीरं कम्प्यते ॥१॥
महामांसं विक्रीय श्मशाने
शुष्क-लोल-चर्म-सूत्रायमानयोः
स्तनयोः दर्पः समधिकःप्रदीप्तः ॥२॥
नृकपाले शोणितं पूर्णं
पाययति स्ववत्सम्
केवलमस्थि भक्षयन् यो
मडमडायते ॥३॥
कोटरगताभ्यां चक्षुभ्यां पश्यति
कपाला स्वकपालं
मस्तके ऽस्याः सान्ध्र कृष्णकेशकलापं,
स्थानं स्थानं मांसशून्यम् ।
शोणितस्य शुष्करेखा
मुण्डमाला-तन्त्रस्याभ्यासः
शान्ति-सङ्गमनं गानमिदानीं

विस्मृतम्। अथ च
सुवासितं सुभाषितं वचनम्
विस्मृता च प्रेताङ्गना प्रेमपुष्प-सुरभिता ॥४॥
इदानीं राजतेऽसकृत्
हासोट्टहासः
श्मशानायितं सदनं,
कौलाचारे सम्मिलिताः
नग्न कपालिका, चण्डा,
प्रचण्डा, कुण्डला, विकला, कारालादयः
सर्वाः प्रेताङ्गनाः ॥५॥
रक्षिता यूनां मुण्डमाला
यतो घटिष्यति सृष्टिः
तासां संपूर्ण जीवनं
क्रीडिस्यति अङ्गनाभिः
पुनः कङ्कालतां भजिष्यति
मस्तकावशेषैः ॥६॥

दीक्षा

सर्वाः स्त्रियः सम्मिलिताः
नूत्ना एका स्त्री भविष्यति ।
अद्यैव दीक्षिताभूयः
कौलाचारे तन्त्रसाधन-सन्दर्भे
भविष्यति नूनं
यस्याः नूतनं जीवनम् ॥१॥
यौनसुखं मुण्डमाला-रुपान्तरं
तारणं मारणं कुत्र वशीकरणमुच्चाटनञ्च
सर्वेषु भविष्यति दक्षा
वृद्धा कङ्कालिनी यस्यै प्रदास्यति
दीक्षाम् ॥२॥
सुखेन कङ्कालदर्शनम्
जीवनं भविष्यति सुदुःसहम्
पुनरपरायाः जीवने
सुखं द्रष्टुं
मुण्डमालया
धन्यमस्याः जीवनम् ॥ ३ ॥

वंशी धारिणी



कस्य स्वरं स्मरसि ?
कस्य गानं स्मृत्वा
कस्य रुपं ध्यायसि ?
कस्य च्छन्दसा
नर्त्तन शीलस्य गानं
सुतरां स्मरसि ?
(परम्परा गणयसि ?)
दीर्घ -वेणुप्रिया त्वं हि
कस्य मनसः प्रियतमा ?
कदम्बक्रोडे कुतः प्रलपसि
कापि तव
विवृत -मुखी रोमाञ्चितदेहा
तव सखी अनुधावति,
किं तवाभिप्रायोऽस्ति ?

वंशी वादकः

चूत-मल्लिका-चम्पक-कुञ्जे
वंशी वादकः किं प्रलपसि ?
स्वरेणाकृष्टाः खगाः मृगास्ते
ताश्च रूपवत्यो विस्मरन्त्यो
यदा मधुरे स्वप्ने मग्नौ ॥१॥
वाद्यस्य तानं
वध्नाति हृदयं
वादयति नटो
मृदङ्गं केवलम् ॥२॥
क उद्धारकः
कस्योद्घाटके
मारकश्च कस्य
कस्य तारकः ॥३॥
सर्वं सम्भवति वंश - खण्ड - स्वने
सर्वं सम्भवति
वंश - खण्ड - विले
स्वल्पं पवनं प्रपूर्य॥

वेणु पाणिः

त्रिभङ्ग्या
वेणुं वादयति प्रियः
सकलजगतो मोहाय,
ग्रामे ग्रामे गोष्ठः
स्वकीयं सदनं भर्त्तारं तनयं
पृष्ठे कृत्वा
प्रतिदिनं ता
वनं गच्छन्ति,
किं ते मायया
मुग्धा चाखिलं जगत् ॥

दर्पण हस्ता

नव यौवने !
हस्तस्थितदर्पणे
किं पश्यसि ?
प्रियतमस्य निविड़ालिङ्गने
चुम्बनम् ?
प्रणयस्यारुणरागः

उद्दामयौवना मिलन-जनितां
प्रिय -मिलन रेखाम् ?
मुखे तव
सहस्रकमलकोरकाणां प्रसन्नता,
देहे असंख्यकदम्बकुसुमानां
रोमाञ्चता ॥ १ ॥
प्रियतमे !
तव मुखच्छायायां
प्रिमतमस्य मुखानुकृति-
मनुसरसि किम् ?
पार्श्वे सखी
प्रसाधनपेटिकां प्रसार्य
अङ्गसज्जां
रचयितुं प्रेरयति ॥ २ ॥

शुकश्रवणा (२)

शालभञ्जिके !
वहुप्रतीक्षा परं
तव नेत्रजलं
यदा शुष्कायितं वहुकालात्
यदा सकला प्रतीक्षा निर्वेदतां गता
समाप्ता चित्तोद्विग्नता,
मुखारुणता वहुकालादस्तमिता,
अङ्गे सकले जडता,
क्व गता क्व गता सा
प्रसन्नता ?
वाचो विदग्धता ?
नेत्रस्य नर्तनशीलता ?
अनङ्गस्यासह्यबाणाहतता ?
इदानीं प्रकृत्या
प्रत्यहं लतामण्डपे
शिथिलं पदं पातयन्ती
शून्येन मनसा
निरुद्वेगतया
स्थिता वर्तते ।
न च गणयति

किमर्थमागमनं तस्याः
यतः सर्वं पूर्वं विस्मृतम् ॥ १ ॥
भूषणं यत् तुच्छायते
विषायते जीवनम्
असनं वसनं सर्वं
न कुत्रापि व्यवस्थितम् ।
यन्त्रवत् चलते वामा
कामक्लेशादि वर्जिता।
किं वदिष्यति कं वा
चिन्ता शून्ये मनसा जीविता ।। २ ॥
निरीक्ष्येमां दशां तस्याः
सारिका पञ्जरस्थिता
व्याकुलेन पञ्जरं त्यक्त्वा
शुकमित्राय निवेदितवती ।
शुक उड्डयते सुखं
स्व स्य च भर्त्तारं प्रति ।
सोऽसौ
दूर देशे युद्धभूमौ
संग्रामे शिविरे यदा
युद्धक्लान्तः संस्मरते प्रियतमां
शुकस्तदा भाषते !
" प्रियतमा तव

क्रमशो दशमां दशां
प्रति गच्छति । ”
विधेः विडम्बनासीत्
युद्धभुमौ मम नियोजनम् ॥ ३ ॥
उड्डयस्व शीघ्रं
वद मम प्रियां,
“युद्धभूमौ अयं जन
स्वदीयं
मुखस्यामलिनामाभां
मुहुः संस्मृत्य युद्धाङ्गने जीवितः ॥”
शुक उड्डयते लता कुञ्जवनम् ।
सधीरं श्रावयति वार्त्ता
शुक वार्त्तया सधीरं त्यजति
स्वस्याः जडताम्
सञ्जीवन्या यथा ।
तस्याः मनसि वपुषि ?
सर्वं जीवयति
नन्दयति सदा ॥ ४ ॥

लतान्विता

चर्तुषु भङ्गेषु
अङ्गं तव वृक्षलतासु क्लान्तम् ।
चूताङ्कुराणां स्निग्धमधुरं
प्रियतमस्य वासमाघ्राय
मदमत्तहस्तिनो मदवारि संस्मरते ।
शरीरे भावमूर्च्छनाया
स्वकीय उद्रेकः
चित्ते प्रसन्नगाम्भीर्यम् ॥



मृदङ्गवाद्याङ्गना

प्रिय सख्याः नर्तनं
तवाभिधानकारकं
सावहितं सप्तस्वरान्
मन्द्रनादं नादयसि ।
प्रिये !
तवसुखं तस्याः सुखे
गम्भीर-नादमुखेन विकशति
त्वदीयं मुखकमलम् ॥



नृत्यरता वाद्याङ्गना

नृत्याङ्गना वा वाद्याङ्गना सा ?
नृत्यति वादयत्यपि
मुखमहिमा तस्याः
पादौ नृत्यतो ।
हस्तौ वादयतो मर्दलवाद्यम् ।
अहो चित्रमस्य
मधुरं नर्त्तनं गम्भीरं गर्जनम्
मर्दल युगलस्य ॥



स्मरणम्

स्मरणेन लभते सुखं
स्मरणं क्लेशस्य कारणम्
गतो गतैष चैत्रदिवसः
गता च मल्लीपुष्प-लीना
चैत्रस्य रजनी,
मालती-वकुलारविन्दसुरभिता
चन्दन लेपेन अङ्गेष्वनङ्गः
प्रियतम-सुखं स्मरेदानीम्



स्तनभुमिः नाभ्यूरुजघनं स्पर्शम्,
संस्मरणं तस्योन्मादकरं यदा
आत्मरतिरतिसुखकरम् ।
अहो चित्रं ! मुहुरालिङ्गनम्
विमर्दनं स्वस्याः पीनोन्नतस्तनम् ॥

आत्मरतिः

विफलं यौवनं प्रिये प्रवासे
गत एषः मधुरो मधुमासः ।
अङ्गेस्वनङ्गस्यासह्यपीडा,
किं कुरुते वामा
स्वस्याः स्तनौ
सधीरं परामृश्य
मर्दयित्वा लभते अतिप्रसन्नताम् ॥
हा हताशा ॥
हा हता सा ॥